M. T. B. COLLEGE, SURAT

Manuscripts Library

No. Ref. / Ser. 377

Title: Shata Sloki With Com.

377

शतश्लोकी सटीका

Incomplete

Shata Shloki. of शंकराचार्य. : Title

with Commentary : Author

: Editor

: Year, Vols.

: Publisher

377 Begins abruptly : Remarks

एवंप्राणादीनांइत्युक्तेदंतीतंनिखिलवृत्त्यात्मकस्यमुख्यप्राणस्यसत्ताप्रकाशदानेनतत्साक्षीसच्चिदा
नंदमात्मानंविशदीकृत्यलक्षयतिव्यापारमिति॥एकमेष्टिदेकेचित्धनस्यचेतरहितचिन्मात्रस्यवस्था॥
त्मनःसत्तयासत्तांप्राप्यसंभूत्वापंचवृत्त्यात्मकः॥पूर्वोक्तप्राणनादिपंचवृत्तमानभूत्वादेहसस्यःसमष्टेसम
ष्टिरूपेणउपाधिस्थोभूत्वाव्यष्टिदेहेव्यष्टिरूपेणोपासकोभूत्वासएवसर्वेंद्रियाणांसर्वेषांशब्दादिज्ञान
॥व्यापारंदेहसंस्थःप्रातिवपुरखिलंपंचवृत्त्यात्मकोसौप्राणःसर्वेंद्रियाणामधिपतिरनिशं
॥सत्तयानिर्विवादं॥ ॥साधनानांतमष्टिव्यष्टिदेहस्थानांकारणानामधिपतिःस्वामीतंविकस
वकरणव्यापारानुपपत्तेःअसौप्राणःपूर्वोक्तप्राणःजीवभूतःसन्प्रतिवपुःप्रत्येकसर्वशरीरेषुस्फुटंव्यक्तंय
थातथाअखिलंसंपूर्णंव्यापारंव्यवहारंकुरुतेनिवर्त्तयेतिसएवंविधसर्वसत्ताप्रकाशदानेनपालकः॥

अतएवसर्वस्यसमस्तस्यकार्यस्यनिमित्तोपादानाभ्यांसाक्षीअव्यवधानेनप्रकाशकःअस्मि
भावानिसर्गेकारणवायोःप्राणःजीवनहेतुःतथाएवंप्रत्यक्परोक्षरहितःआत्मासकलतनुभृतांशम
वाहमस्मीत्यर्थः॥अत्रश्रुतिःप्रमाणयति॥एवंप्रत्यक्परोक्षरहितःप्राणस्यसमष्टिव्यष्टिरूपेणसकलज
॥यस्येत्थंविद्वनस्यस्फुटमिरुकुरुतेसोस्तिसर्वस्यसाक्षीप्राणस्यप्राणएवेह्यखिलतनुभृतां
॥चक्षुषश्चक्षुरेवः॥९९॥ ॥गत्व्यापारकारणवायोःप्राणःजीवनहेतुःतथाएवंप्रत्यक्पर ॥ १०
रोक्षहीनःआत्मासकलतनुभृतांशमस्तशरीरधारिणांव्यष्टिसमष्टिजीवानांमाचक्षुषःज्ञानस्यचक्षुषः
ज्ञानप्रकाशकइत्यर्थःप्राणस्यप्राणस्यप्राणमुतचक्षुषःश्चक्षुरित्यादिश्रुतेः॥९९ ॥छ॥ ॥छ॥

एवंसर्वप्रकाशकत्वेनलक्षीकृतस्यैवस्थूलनादिरवननत्यायेनदृढीकरणायतदेवसर्वप्रकाशकत्वमुक्त
मपिनतत्रसूर्योभातिनचंद्रतारकंनेमाविद्युतोभांतिकुतोयमग्निः॥तदेवभांतमनुभातिसर्वतस्यभा
सासर्वमिदंविभातीतिश्रुत्यंतरप्रमाणेनदृढयतियंभांतमितिप्रविरलगतयःअन्योन्यंनश्लिष्टागतिः
॥यंभांतंचिद्घनैकंक्षितिजलपवनादित्यचंद्रादयोयेभासातस्यैवचानुप्रविरलगतयोभांतितस्मिन्वसंति॥
स्वरूपव्यवहारादिस्थितिर्येषांतेतथाभूताःक्षितिःपृथिवीजलंतोयंपवनोवायुःआदित्यःसूर्यचंद्रःसोमः
आदित्यैवांवागादीनांतेसर्वेयस्यचिदानंदघनएकनिरपेक्षंअन्यनिर्वाहकक्षमंआत्मानंस्वांतःस्वतःप्र
काशमानंसंतंअनुपश्चाद्भांतिप्रकाश्यन्तेकिंचतस्मिन्चप्रकाशसनदात्मनिवसंतितिष्टंति॥तत्सत्तांप्रा
प्यैवस्वस्वप्रकारक्षमाजाताइत्यर्थः॥

त्तनुक्तलक्षणं परेशं सर्वजगत्कारणभूतं ब्रह्मेति नियंतारं शांतं जगद्वासनास्पृष्टं अनंतं विनाशयनाशा
त्तथानुपपत्त्या स्वतो नाशहीनं कविं ज्ञानस्वरूपं शास्त्रयोनित्वेन सर्वज्ञत्वोपलक्षितमित्यर्थः ॥ अजं जन्म
शून्यं ॥ अमरं मृतिशून्यं जन्मनाशान्यथानुपपत्त्या जन्ममरणहीनमित्यर्थः ॥ तन्नैवोक्तं तद्द्वयं स्पष्टार्थं ॥ शाश्व
तं नित्यं ॥ जन्मशून्यं मरणरहितं ॥ एतेन यास्कपठितं जायते स्ति वर्धते विपरिणमते अपक्षीयते विनश्यति
॥ विद्युत्पुंजो ग्निसंस्थोप्युडुगणविततिर्भासयेत्किं परेशं ज्योतिः शांतं ह्यनंतं कविमजममरं शाश्वतं जन्मशून्यं ॥ ९ ॥
इति षड्विकाराजपि निरस्ता ज्ञेयाः ॥ तमात्मानं विद्युत्पुंजो विद्युतां पुंजाः समूहः लोकदृष्ट्या प्रकाशको पि तथा
ग्निसंघैः वह्निनां संघः स्तथाभूतो पि तथा नक्षत्राणां गणस्य समूहस्य विततिः विस्तारः उपलक्षणमेतत्सूर्यादि
नां तत्सर्वं प्रकाशजातं भासयेत् किं नैव प्रकाशयेत् ॥ लोके प्रकाश्यस्य प्रकाशकप्रकाशयितृत्वं तदृष्टमिति भावः ॥ ९

॥ पञ्च ॥

एवंभूतात्मानुभवतो जीवन्मुक्तिफलं नु चलीत्याह ॥ न क्रमेति ॥ यस्य कस्यापि रसूक्ता ॥ जातिवर्णाश्रम
यो वस्था स्त्रीपुरुषोत्वतिवादिने दृष्टा लोकदृष्टाः न शास्त्रीयज्ञानप्रतिबंधकारोति सूचितं ॥ लौकिका
नामनधिकारित्वं भ्रमतानामात्तिद्देशिकाधिकारितनिरूपितवाक्यैर्बाधास्यदृश्यमानत्वात् ॥ पुंसः इत्य
नेन मुमुक्षोः मोक्षः मुख्यसाधनतत्त्वज्ञानकारणगुरुशुश्रूषापूर्वकश्रवणादि पुरुषप्रयत्न एवापेक्षित इति सूचितं ॥
॥ तत्क्रमेवाहमस्मीत्यनुभवत इतीतो यस्य कस्यापि चेद्वै ॥ पुंसः श्रीसद्गुरूणामतुलितकरुणापूर्णपी
॥ यूषहृद्या ॥ यस्य कस्याप्यधिकारिणः पुरुषस्य श्रीसद्गुरूणां मुक्तिश्रीसहितानां सद्रूपब्रह्मसाक्षात्का
रवतां गुरूणां देशिकचर्याणामुक्तिमत्वे च श्रुतिः ॥ भद्रैषां लक्ष्मीर्निहिताधिवाचि ॥ अस्ति ब्रह्मेति चेद्वेद संतमे
नं ततो विदुरिति ॥ अतुलिताऽनिरूपमाया करुणा तया पूर्णा भरिता अत एव पीयूषममृतं तद्वन्मरणनिवर्तिका

दृष्टिर्ज्ञानं तया दृष्ट्वा दृश्यते तत्वं यया बुध्येति श्रुतेः गुरुतया आप्तया ब्रह्मविद्ययेत्यर्थः ॥ तदुक्तलक्षणं ब्रह्मैव
देशकालवस्तुकृतपरिच्छेदरहितं तत्पदलक्ष्यं कूटस्थस्वरूपमेव ॥ ततः पृथगहं न भवामीत्येवं नो भ्रमयुक्तः
अनुभवः साक्षात्कारः उदितः आविर्भूतः चेत् यदि स्यात् तदानीमेव स पुरुषः भ्रमविधुरमनाः भ्रमेण
॥ जीवन्मुक्तस एव भ्रमविधुरमना निर्गतेनाद्युपाध्यौ नित्यानंदैकधामप्रविशति परं नष्टसंदेहवृत्तिः ॥ १७
विपरीतज्ञानेन विधुरं विमुक्तं मनः जीवन्मुक्तिव्यवहारयोग्यं प्रारब्धशेषं यावन्मनो यस्य अत एव नष्टसंदे
हवृत्तिः नष्टाः विलीनाः संशयविशिष्टाः वृत्तयो यस्य तथा तथाभूतः सन् जीवन्मुक्तः भवति ॥ तस्यैव देहमुक्तिः ॥
फलमित्याह ॥ स एवेति ॥ स जीवन्मुक्त एव प्रारब्धांते अनाद्युपाध्यौ निर्मूलमायोपाध्यौ निर्गतैः स्वरूपतो लयं प्रा
प्ते रातिबीजनाशपूर्वमेव ज्ञानसमकालं जातत्वात् ॥ परमकार्यकारणस्पृष्टं ति रूपाख्यिकमित्यर्थः ॥ नि
त्यानंदं निरतिशयं बाधहीनरूपं एकं मुख्यधाम तेजः गृहं च स्वरूपं सर्वसूर्यादितेजः प्रकाशकत्वात् ॥

॥ समश्लोकीवृत्तिः ॥ आनंदतीर्थः ॥ १९ ॥ श्री

इदानीं तस्यैव ज्ञानिनो यावत्प्रारब्धं सर्वव्यवहाराप्रतिबंधकत्वेन जीवन्मुक्तिसुखमनुभवितुं सर्वदेहाद्यन्य ॥ स ॥
नुसंधानपूर्वकं स्वात्मसुखानुसंधानमाह ॥ नो देह इति ॥ देहः पंचीकृतकार्यः अन्नविकारः अहं न ॥ मम वि
द्रूपत्वात् ॥ सत्वाच्च ॥ देहस्तु क्षरं ॥ अतिचपलमिति हेतुगर्भितविशेषणद्वयं ॥ क्षितान्नाशमित्वात् ॥ अन्यथान्य
थापरिणामित्वेन ॥ तिचंचलत्वाच्च आत्मानुसद्रूपत्वेन स्थिरश्चिद्रूपश्चैव अनुभूयते ॥ अतो वैलक्षण्यादुभयोरन्यात्मा
॥ नो देहो नेंद्रियाणि क्षरमतिचपलं नो मनो नैव बुद्धिः प्राणो नैवाहमस्मीत्यखिलजडमिदं वस्तुजातं कथं स्यां ॥
देहो न भवामि ॥ किंतु देहस्तु नास्त्येवेत्यर्थः ॥ किंच ॥ अहमात्मा इंद्रियाणि ॥ क्रियासाधनानि ज्ञानसाधनानि चेतु
मयात्मकानि देहोऽहं न भवामि ॥ इंद्रियाणामन्योन्यव्यावृत्त्या असत्वप्रतीतेः ॥ विषयाणामसत्वेनेंद्रियाणामसत्वस्या
नुभूयमानत्वाच्च चंचलत्वाच्च तान्यहं न भवामि पूर्वविशेषणद्वयमप्यनात्महेतुनानुयोज्यं ॥ किंच ॥ अहं ॥ मनः संशया
यात्मकं न भवामि नास्मि ॥

कामादिवृत्तिमत्वेनोत्पत्त्यादिमत्वेनचविकारवत्त्वादसत्त्वाच्चमनोनास्त्येवअहंतुमनोविकाराणामन्य

त्तिविनाशयोश्चस्वप्रकाशकत्वेनसच्चिद्रूपेणप्रकाशमानःअस्म्येवातोमनोनाहमित्याशयः॥किंचबुद्धिःनि

श्चयात्मकांतःकरणवृत्तिरपिअहंनभवामि॥जाग्रदाद्यवस्थासाच्चतेनोत्पत्तिविलयवत्त्वात्॥अहंतुआ

॥नाहंकारोनदारगृहसुतसुजनक्षेत्रवित्तादिदूरंसाक्षीचित्प्रत्यगात्मानिखिलजगदधिष्ठानभूतःशिवोहं॥१२॥

त्माअवस्थात्रयतद्बुद्धिसाक्षीसच्चिद्रूपःसबुद्धिःकथंस्यांनैवस्यामित्यर्थः॥किंचप्राणःपंचवृत्त्यात्मकःशा

रीरोवायुःअहंनेवास्मिनैवभवामिइदंममकूटस्थात्मनोप्रकाश्यंअखिलंजडंसर्वजडंअचिद्रूपंदेहादिवस्तु ॥पत्र॥

जातंपदार्थसमूहंकूटस्थसच्चिदानंदःकथंस्यांकेनप्रकारेणभवामि॥अतएवाहंकार्येस्यसर्वस्यदृश्यत्वात् ४

जडत्वादशावाहिकत्वादिसाक्ष्यअहंकारस्यापितथात्वात्सअहंकारःअहंद्रष्टासच्चिदानंदःकूटस्थःइत्यतोवैल

क्षण्यान्नभवामि॥अतएवदारास्त्रीगृहंवेश्मसुताःपुत्राःसुजनाःसंबंधिबांधवमित्रभृत्यादयःक्षेत्रंभूमिः

वित्तंद्रव्यंआदिमुख्यंयथाजातिकुलवर्णाश्रमधर्माधर्मादिःतत्सकलमपिदेहादिसापेक्षसिद्धत्वात्साक्षी

प्रकाशकत्वाच्चिज्ज्ञानं॥धिलकत्वात्दूरंअतस्तन्नेवाहमस्मिअहंत्वएतस्यदेहादिजडवस्तुजातस्यसाक्षाद

॥व॥ वबोधनेनप्रकाशकत्वाच्चिज्ज्ञानं॥सर्वांतरत्वेनस्वतःप्रकाशमानत्वात्प्रत्यगात्मत्वात्वृत्तात्तद्रूपत्वादात्मा

यंविनासर्ववस्तुशाधिष्ठानस्यशबलब्रह्मणोप्यसिद्धेरुपचारेणनिखिलस्यसमस्तस्यजगतोविश्वस्याधिष्ठान

भूतस्यअधिष्ठानत्वेनोक्तःशिवःसुखस्वरूपःअस्मि॥१२॥ ॥श्री॥ ॥श्री॥ ॥

एवंजीवन्मुक्तस्यात्मानुसंधानमुक्त्वेदानींप्रकारांतरेणतदेवपुनराह॥ दृश्यमितितियत्प्रकारकंएतत्दृश्यंतयाप्र
तीयमानंरूपंरूप्यतेप्रकाश्यतइतिरूपंप्रकाशितंतत्सर्वंदृश्यंदृग्विषयाज्ञानेकरूपंनीलपीतादिनीलंश्याम
पीतंगौरंइत्यादिविविधगुणत्वात्एतस्यप्रतीयमानस्यसर्वस्यअनेकविधस्यरूपस्यदृक्दृश्यतेरूपमनेन
यातादृष्टिःवैनिश्चयेनस्फुरदनुभवतःस्फुरतिप्रतीयतेअनुभवरूपास्फुरणा॥ यस्यांसातथोक्तासालोचनरूपा
॥दृश्यंयद्रूपमेतद्भवतिचविविधंनीलपीताद्यनेकंसर्वस्यैतस्यदृग्वैस्फुरदनुभवतालोचनंचैकरूपं॥
लोकानसाधनत्वात्॥ तच्चैकरूपंएकविधेचप्रतीयते। किंचतल्लोचनमपिदृश्यंप्रतीतिविषयंअतोजडंतस्यापिदृ
क्दृग्निसाधनंमानसंमनःअस्तितस्यापिमानसस्यपिदृश्यत्वंनानुभूयमानत्वात्तस्यदृग्दृष्टिः॥ धीनिश्चयात्म
कंअंतःकरणंतस्यापिअनुभूयमानत्वात्॥ विपरिणतविषयाकारधीवृत्तयोपिपरिणामनविषयादृश्यंतिते
नानेकविधत्वात्॥ विविक्तत्वात्॥ धियोवृत्तयोदृश्याएवसर्वस्यैतस्यजडविकारित्वेनात्मत्वंनिश्चयं॥ इदंजड

॥पत्र॥ ५

समूहेसर्वस्मिन्प्रभुःसर्वप्रकाशनसमर्थःसाक्षीअप्यवध्यानेनसर्वप्रकाशकःआत्मादृग्रूपएवसर्वत्र
काशसाधनभूतोपितथापिविषयवन्नैदृश्यतेअनुभवविषयोनैवभवतीत्यर्थः॥१२॥ ॥छ॥ ॥धि
॥तदृश्यमानसंदकपरिणतविषयाकारधीवृत्तयोपिदृश्याद्दृग्रूपएवप्रभुरिहसतयादृश्यतेनैवसाक्षि॥१३॥
॥रज्ज्वज्ञानाद्भुजंगस्तदुपरिसहसाभातिमंदांधकारे॥स्वात्माज्ञानात्तथासौभृशमसुखमभूदात्मनोजीवभावः॥
इदानीतस्यैवजीवन्मुक्तस्यस्वगुरुवचनविश्वासपूर्वकंयुक्त्यास्वजीवत्ववाधेनस्वात्मानुसंधानमाह॥
रज्ज्वज्ञानादिति॥ यथामंदांधकारइवदंधकारवृत्तेअलोकेरज्ज्वज्ञानात्रज्जुस्वरूपानवलोकनात्स्वसदृ
शेनवलोकेनेआत्मानिजसोसमस्ताज्ञानानुभूयमानः॥ भृशंअत्यंतंअसुखंदुःखरूपसात्मनःसंसारं
विनारोपासिद्धेःआत्मंबंधीजीवभावःजीवत्वंभातिप्रकाशतेइत्यर्थः॥ सम्भ्रांतिरेवेतिभावः॥

यथारज्जुसर्पदृष्टांतेनआप्तोक्त्याप्रमाणिकपुरुषवचनविश्वासेनजहिभ्रमंतेसर्पभ्रांतिनिवृत्तौसत्यां
ससर्पःप्रत्ययःपूर्वंदिवितोज्ञानासंतिरएकारज्जुरेकाज्ञातरज्जुरक्षितारज्जुःस्वदर्शनप्रत्ययंएवंआभूतजाता
तेनप्रकारेणनिजगुरुवचसोनिजःस्वियःदेशिकःतस्यवचसायुक्त्यातत्त्वमस्यादिवाक्यार्थबोधनरूपंतेनस्वा
॥आप्तोक्त्याहिभ्रमांतेसत्वरखलुविदितारज्जुरेकातथाऽहंकूटस्थोनैवजीवोनिजगुरुवचसासाक्षिभूतः
॥शिवोहं॥१३॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥
तेनभ्रांतेजीवत्वभ्रमेनष्टेसतीत्यर्थः॥अहंजीवोसुखीदुःखीजननमरणकर्तृभोक्तृरूपःनैवनास्म्येव॥अहं ॥पत्र॥ ६
साक्षीभूतःजीवत्वस्याप्यवलितप्रकाशकत्वात्साक्षित्वोपचारवान्वस्तुतस्तुकूटस्थःनिर्विकारःशिवःज्ञानं
स्वरूपःअस्मि॥१३॥ ॥छ॥ ॥छ॥

इदानीतस्यैवजीवन्मुक्तस्यस्वदृढदिगुरुशिष्यभावंप्रकल्प्यसंवादेनस्वस्यपरमज्योतिस्वरूपानुसंधानमाह॥किंज्योतिरिति
इति॥हेशिष्यत्वंतत्त्वअहनिदिवसेकवादिप्रकाशव्यवहारोरात्रौचनिशि॥किंज्योतिस्तेजःकिमस्ति॥तद्वस्तुकथ्यतां॥येनदिन
रात्रव्यवहारःसिध्यति॥इतिपृष्टेगुरुणा॥शिष्यःचक्षुःनेत्रंहत्याह॥येनलोकेप्रकाशकंसूर्यचंद्राग्निरूपंप्रकाशकंद्रव्य
॥किंज्योतिस्तेवदस्वाहनिरविरिहमेचंद्रदीपादिरात्रौस्यादेवंभानुदीपादिकपरिकलनेकिंतवज्योतिरस्ति॥
तत्प्रकाशकंद्रव्यंचव्यवह्रियते॥तच्चक्षुरेवज्योतिरित्यर्थः॥एवमुक्तेशिष्येणदत्तेसतिगुरुःपृच्छति॥तन्मीलनइतितन्मी
लनेचक्षुषःनिमीलनेदत्तेसतिकिंज्योतिःपश्चात्सूर्यचंद्राग्नीप्रकाशकतत्प्रकाश्यघटादिस्फुरणस्यकिंप्रकाशकंसाध
कंतेजःतत्अस्तिइतिपृष्टःशिष्यआह॥नेत्रनिमीलनोत्तरसर्वव्यवहारस्फुरणसाधनंज्योतिःनितरांअत्यंतंप्रकाशकंबुद्धि

अस्तीत्युत्तरमाहुरुवत्तं॥ततोगुरुः पृच्छति॥धियइति॥धियोपिबुद्धेः नेत्रसूर्यादिवत्प्रकाश्यत्वेनानुभूयमानायाः तेत
प्रकाशकेज्ञेयत्वव्यवहारेतत्रकिंज्योतिस्तेजः इतिपृष्टः शिष्यः आह॥अहमितिममबुध्यनुभवितृत्वात्तत्रबुद्धिप्रकाश
व्यवहारेसाधकमहज्योतिरहमस्मि॥एवमुक्ते शिष्येणगुरुः पृच्छति॥तत्रेति॥तत्रापिअहंत्वस्यापिअनुभूयत्वमहं
व्यवहारसाधकंज्योतिः किंप्रकाशकंतेजः अस्तिइतिपृष्टः शिष्यआह॥अहमिति॥अहंत्वप्रकाशकआत्मा अस्तीत्यर्थः॥
॥चक्षुस्तन्मीलनेकिंभवतिचसुतरांधीधियः किंप्रकाशेतत्रैवाहंततस्त्वतदसिपरमकंज्योतिरस्मिप्रभो॥२॥
एवमुक्तोगुरुराह॥तत्त्वमिति॥त्वदन्यस्यकस्यापिप्रकाशद्रष्टृत्वस्य अभावात्॥प्रकाशद्रष्टृत्वस्यापितत्प्रकाशयि
तुमशक्यत्वात्त्वयंज्योतिस्त्वंप्रकाशमानत्वात्तत्परमकंज्योतिः कार्यकारणप्रकाश्यप्रकाश्यत्वात्त्वयः स्पष्टंतेजस्त्वं
पदलक्ष्यो आत्मास्मिभावाभिन्नतस्तज्ज्योतिः प्रभः प्रकर्षभास्यरूपः अस्मीत्यनुभावः अत्रार्थेबृहदारण्यकश्रुतिरपि॥ ॥पंच॥
॥आत्मैवास्यज्योतिरित्यादिका॥१४॥ ॥छ॥ ॥७॥

एवंभूतानुभववतोजीवन्मुक्तस्यव्यवहारमाह॥किंचिदिति॥सब्रह्मवेत्ताजीवन्मुक्त इत्यर्थः॥किंचित्कालंकिं
चित्कालपर्यंतंयथालोकंयथाधिकारिव्यक्तिपरिछेदककालपर्यंतमित्यर्थः॥किंचित्कालं॥कोस्थूलदेहापेक्ष
यापृथिव्यां॥वस्तुतस्तुब्रह्मवासिष्ठादीनामपिअन्यलोकेषुस्थितत्वात्कोक्षेत्रशब्दवाच्येनः करणेस्थित वर्तमान
॥किंचित्कालंस्थितः कोपुनरिहभजतेनैवदेहादिसंघंयावत्प्रारब्धभोगंकथमपिसुखवच्चेष्टतेसंगबुध्या॥
इयलक्षितोपिइहपृथिव्यांक्षेत्रेचपुनः देहस्य क्षत्रादिसत्वनिवृत्तेः पश्चाद्देहादिसंघंस्थूलदेहे स्त्रीपुत्रमित्र
भ्रात्रादिसमूहंनैवभजतेनैवांगीकरोति॥सत्त्वेनात्मनितत्संबधवत्वप्रतीतिंनकरोतीत्यर्थः॥किंचक्षेत्रेस्थू
लदेहादिसंघेचयावत्प्रारब्धभोगप्रारब्धभोगपर्यंतंकथमपिब्रह्मवेत्तुः॥ईश्वरत्वेनमायाप्रारब्धयोरधीनत्वाभ्यां
वातद्विनावकर्तृत्वभोक्तृत्वान्यथानुपपत्त्याप्रारब्धभोगस्यचब्रह्मज्ञानांब्रह्मादीनांकर्तृत्वभोक्तृत्वव्यवहारस्यापि

दृश्यमानत्वात्सर्वव्यवहारस्यपामात्रत्वेन॥निर्विचयोगीब्रह्मवेत्व्यवहारइतिभावः॥असंगबुध्याअसंगब्रह्मात्म
बोधेनसुखंयथाभवतितथानिःसंशयत्वान्निर्दुःखमित्यर्थः॥चेष्टतेचेष्टावत्वेनप्रतीतोभवतीत्यर्थः॥तस्यासं
गबोधमेवोत्तरार्धेनविशेषणैर्विशदयति॥निर्द्वंद्वःसुखदुःखादिद्वंद्वहीनः॥तत्रहेतुर्नित्यशुद्धः॥जीवत्वस्यपा
पपुण्यवत्वेनअशुद्धत्वस्यकल्पितत्वात्ब्रह्मणोऽभेदज्ञानस्युत्तानिनःकालत्रयेपिपुण्यपापहीनत्वान्नित्यशुद्धत्वमि
॥निर्द्वंद्वोनित्यशुद्धोविगलितममताहंकृतिर्नित्यतृप्तोब्रह्मानंदस्वरूपःस्थिरमतिरचलोनिर्गताशेषमोहः॥१५
तिभावः॥अतएवविगलितममताहंकृतिःअत्यंतमुत्पत्तिबीजरहितत्वेननष्टेममताअन्यत्रपुत्रादौदेहादौचाहं
कृतिस्तादात्म्यंयस्यसः॥अतएवनित्यतृप्तः॥निरंकुशसंतोषवान्॥तत्रहेतुः॥निर्गताशेषमोहः॥निःशेषनिवृत्तःअ ॥पत्र॥
शेषःमूलाज्ञानतत्कार्यज्ञानपर्यायःअज्ञानसमूहः॥विपरीतज्ञानसहितोयस्यअतोज्ञानविचेष्टायामप्रतीयतेसामा ॥८॥
॥न्यमितिभावः॥१५॥ छ॥

इदानींज्ञानिनिप्रतीयमानस्यचेष्टामात्रस्यसंरंजनकस्यभावंसहेतुकंप्रपंचयति॥जीवात्मेति
॥यावन्महावाक्यजन्यत्वेसतिगुरुमुखश्रुत्यास्वतोयुक्तिपूर्वकसंभावितत्वेननिश्चितं॥ज्ञानंचमरे
वृत्याख्यं॥प्रकाशैकरूपं॥प्रकाशएवैकंमुख्यंरूपंयस्यतोदृशंसहसाअकस्मात्तत्कालमित्यर्थः॥
॥जीवात्मब्रह्मभेदंदलयतिसहसायत्प्रकाशैकरूपं॥विज्ञानंतच्चबुद्धौसमुदितमतुलंयस्यपुंसःपवित्रं॥
जीवात्मब्रह्मभेदंजीवात्मनःत्वंपदलक्ष्यस्यकूटस्थस्यब्रह्मणःतत्पदलक्ष्यस्यचभेदंभिन्नत्वंकारणेनमूलाज्ञा
नेनसहदलयतिनाशयति॥नतादृशंपवित्रंरागद्वेषादिवासनारहितसर्वमूलनिवर्तकत्वात्पावनंतद्धि
ज्ञानेनसदृशंपवित्रमिहविद्यते॥इतिभगवदुक्तेः॥अतुलंनिरुपमंयस्यजीवात्मब्रह्मभेदस्यअधिकारी॥

पिणस्यपुंसःपुरुषःप्रयत्नवतःबुद्धेःशुद्धावःकरणेसमुदितंसंज्ञायविपर्ययरहितमाविनस्यपुरुषस्यते
नैवान्यसाधननिरपेक्षेणज्ञानेनकर्त्र्यासंसृतेःकारणंसंसारस्यहेतुःस्वरूपमायायास्वतःकार्यकारणहीनेवं
॥मायांतेनैवतस्याक्षयमुपगमितासंसृतेःकारणंयानष्टासाकार्यकर्त्रीपुनरपिभविनानैवविज्ञानमात्रात्॥१६॥
नाथश्रुत्याप्रवृत्त्यपरपर्यायाक्षयंनाशंउपगमिताप्रापिताविज्ञानमात्रात्आभासमात्रत्वेनसामायापुनरपि
नाशंप्राप्तेःपश्चादित्यर्थः॥अपिशब्दात्पूर्वमपिकार्यकर्तृत्वेनदृष्टानासीत्किंपुनर्ज्ञानानंतरमित्यर्थः॥ ॥पत्र॥
नष्टानाशंप्राप्तासती॥कार्यकर्त्रीकार्यभ्रमस्यकर्त्रीजनिकानैवभविताभविष्यतीत्येवनिश्चयएव॥१६॥ ॥२॥

इदानींभासमानायामपिसंसृतौज्ञानिनितत्त्यागंदर्शयंतेनसंभावयंनाहं॥विश्वमिति॥असौज्ञानिवि
श्वंजगत्तन्नास्तिइतिप्रमाणात्॥एवंविधस्वतःप्रमाणभूतात्॥नेहनानास्तिकिंचनेति॥श्रुतिवाक्यम्
दित्यर्थः॥विगलितजगदाकारभाजःविगलितंबीजसहितंनष्टंजगतःआकारइवआकृतिमद्भानंभासनं
॥विश्वंनेतिप्रमाणाद्विगलितजगदाकारभानस्यजंतोःपीत्वाप्यद्वैतफलंअस्त्यजनिचसुतरांत
स्यकिंचहृत्तासर्वप्रपादेनसम्यक्चिद्घनैकामृतरसकवलास्वादपूर्णोस्मि स्फूर्तंसौरभ्याढ्यं॥७॥
नीनतयाचिद्रूपतयायद्घनंनिबिडंअत्रान्नजगदादिप्रवेशःयथाग्रासःहस्तेनमुखेक्रियतेतद्वत्संसारसंयोग
रूप्येनातःकारणस्यविचारूपमुखेनतःग्रासत्वेनोक्तः तस्यास्वानंदोनुभवनंमुखंस्थितग्रासस्यजिह्वाये

वर्तेन पूर्णः नित्यतृप्तः सन् एवं उक्तरीत्या अखिलं समस्तं जगत् विश्वं निःसारं सत्वसुखहीनं अत एवेदं दृश्यत्वेन
प्रतीयमानत्वात् चित्तरहितं ज्ञात्वा अनुभूय शांतचित्तः शांतं अर्जितं बीजत्वेनोपरतं चित्तं वृत्तयो यस्य स तत् जगत्
विसृजेत् तत्र दृष्टांतः ॥ यद्वदिति ॥ लोके यद्वत् यथा जोके पिपफलाभः नारिंगादेः फलस्य अभः रसं सुतरां अत्यंत

॥ सम्यक्स च्चिद्घनैकामृतसुखकवलास्वादपूर्णो हृदासौ ज्ञात्वा निःसारमेवं जगदखिलमिदं स्वप्रभः
॥ शांतचित्तः ॥ १९ ॥

निःशेषमित्यर्थः ॥ पीत्वा आश्य तत्फलं पीतरसं फलं सौरभाढ्यं सुगंधं त्यक्तमपि वै निश्चयेन फलगतसौ ॥पत्र॥
गंध्यस्य तास्मिन् हेतुत्वाभावात् तत्भावस्य तृप्तपेक्षाभावाच्च ॥ त्यजत्त्यजति ॥ यद्वदिति सबंधः ॥ १७ ॥ छ ॥ ॥२०॥

इदानीं तानिबाधितां हंकारादिजगत्स्वतीतावपि बंधकत्वं कर्मणां न भवतीत्यर्थे भिद्यते हृदयग्रंथिरि
त्यादिकां श्रुतिप्रमाणयन् निक्षीयंत इति ॥ तस्मिन् त्सर्वं वेदांतोक्तलक्षणलक्षिते ॥ तान्येव लक्षणा
न्याह लक्षणेः ॥ चिन्मात्ररूपे चेत्यरहिते चिन्मात्रे तत्र हेतुः गुणमलरहिते ॥ गुणस्तारागद्वेषादयः
॥ क्षीयंते चास्य कर्माण्यपि खलु हृदयग्रंथिरुद्भिद्यते वै छिद्यंते संशया ये जनिमृतिफलदा दृष्टमात्रे परेशे ॥
गुणरूपश्च मलाः बंधनलयहेतवस्तैः रहिते लक्षीते हीने तत्त्वमस्यादिलक्ष्ये तत्त्वमहावाक्यैः भागत्यागल
क्षणयैव केवलं लक्षितुं योग्ये ब्रह्मणि जमरहित्ये इशे तं विना मायातत्कार्ययोर निर्वाहो नियंतृत्वाद्युप
चारितेअखिले विधिमनोगोचरे समस्तविधिवाक्यानाम नियोज्ये अविषये च मनसां वाचां विषये कूटस्थे
निर्विकारत्वे सगात्म निभृतमुखवृत्त्यैवाज्ञानमात्रनिरसेन जाते स्वयमेव प्रकाशमाने आत्मनि वस्तुनि

स्यस्मिन्परेशेपरेषांब्रह्मादीनांक्षीयंतेचास्यकर्माण्यपिखलुहृदयग्रंथिरुद्भिद्यतेवाछिद्यंतेसंशया
येजमायायाश्चनिपंतत्रोपचरितितेमात्मानंविनातेषांकार्याणांचासिद्धेःदृष्टमात्रंकेवलंभयंतेगत॥अ
कूटस्थब्रह्मस्वरूपभूतातःकरणवृत्तिमत्तत्कर्माणिसंचितप्रायमारब्धानिसर्वाण्यपिक्षियंतेनश्यंतिभवंति॥
तत्रहेतुमाह॥खल्विति॥अस्येत्यनुवृत्ताकूटस्थब्रह्मसाक्षात्कारवतःपुरुषस्यहृदयग्रंथिःहृदंतःकरणत

॥नस्मिंश्चिन्मात्ररूपेगुणमलरहितेतत्त्वमस्यादिलक्ष्येकूटस्थेब्रह्मणात्मन्यखिलविधेमनोगोचरेब्रह्मणीशे॥१९॥

स्यायःप्रकाशकःआत्मानयोर्ग्रंथिरस्वात्माज्ञानपूर्वजन्यान्यतादात्म्यरूपेणैकरूपःसंश्लेषःसःनिश्चयेनखलुन
उद्भिद्यतेतयोरंतःकरणचिदात्मनोर्भेदप्रतीत्याछिन्नोभवति॥तच्छिंगमाह॥छिद्यंतइतिसर्वसंशयाःदेहादा ॥पत्र॥
त्माभिन्नोवाभिन्नःइत्याद्यःअज्ञानग्रंथिमूलत्वात्तेषांतन्निवृत्तौछिद्यंतेतन्नश्यंतितत्फलंचाह॥विशेषणेनज ॥११॥
नितिमृतिफलदाइतिजन्ममरणनिवृत्तिवज्ञानफलमित्यर्थः॥१९॥

इदानीमेतादृशज्ञानिनोब्रह्मात्मसाक्षात्कारवृत्तेर्वासनाजाननपर्यंतंदृढीकरणायध्यानंतत्पूर्वविघ्नक
र्तृव्यसनितभ्रमाह॥आदाविति॥आदौउत्पन्नेःप्राकृतथातेनाशावंतरंमध्येप्रतीतिकालेआसक्तौ॥तन्निजतिम
तिफलदां॥ज्ञानिर्जन्म॥मृतिर्मरणंतेरवृक्षफलेतयोर्दातारंकर्ममूलंकर्मक्रियासामूलंयस्यविशालंमहांतंभ्रमोवि
परीतज्ञानंमदस्वश्चैवज्ञानंमुदिताळयवृत्तिःशोकःदुःखवृत्तिःइत्यादीनिजनेकानिपात्राणिपर्णानियस्य

आदौमध्येतथांतेजनिमृतिफलदंकर्ममूलंविशालंज्ञात्वासंसारवृक्षंभ्रममदमुदिताशोकतानेकपत्रं॥२०॥

कामक्रोधादिशाखं॥कामश्चप्रियविशायिणीच्छा॥क्रोधःतत्प्रतिबंधकेरोषवृत्तिः॥आदिपदेनलोभादिवृत्तयः॥
ताएवशाखाइवयस्य॥सुतपशुवनिताकन्यकापक्षिसंघं॥सुताःपुत्राःपशवःगोवृषादयःवनिताःस्त्रियःकन्य
काःदुहितरःतेपक्षिणःपतत्रिणस्तेषांसंघोयस्मिन्संसारवृक्षेसंसरणस्वभावंवृक्षमनित्यत्वाधृक्षं॥२०॥

ऊर्ध्वमूलोवाक्शाखाइत्यादिश्रुतेः॥ऊर्ध्वमूलमधःशाखंइत्यास्मृतेश्चअश्वत्थपर्यायं॥ज्ञात्वाअसत्वेन
प्रतीयअनुभूतेत्यर्थः॥ततएवंउक्तलक्षणंसंसारवृक्षंपटुमतिःपट्वीकुशलामतिमननवतीवृत्तिर्यस्यसपुमा
नअसंगासिना॥स्वासंगत्वानुभवएववासिःखड्गस्तेनछित्वाविनाश्यअभितः॥छ॥ ॥छ॥ ॥छ॥

॥कामक्रोधादिशाखंसकृतपशुवनिताकन्यकापक्षिसंघंछित्वासंगासिनैनंपटुमतिरभितश्चिंतयेद्वा
॥सुदेवं॥१९॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥छ॥ ॥पत्र॥

सर्वदावासुदेवंवाविकल्पेनअसूनांप्राणेंद्रियादीनांदेवप्रकाशकःआत्मानंचिंतयेत्॥अनुभवेत्॥प्राणा ॥१२॥
दानांसत्वासत्वेनप्रकाशकेत्वइतिकल्पइतिभाव॥१९॥ ॥छ॥ ॥छ॥ ॥छ॥

इदानींसर्वोत्पत्तिस्थितिलयाध्यारत्वेनस्वात्मनब्रह्मत्वानुसंधानपूर्वकंस्वात्मज्ञानस्यैवाखिलकर्मसमाप्ति
त्वंद्योतयन्नात्मानंनमस्करोतिजातमिति॥सर्वसमस्तद्वैतजातंमय्येवब्रह्मणिनिष्कूटस्थात्मसंज्ञितेब्रह्मा
त्मनि॥एवकारेणान्यःकोपिअधारोनास्तीइतिसूचितं॥जातंआविर्भूतंपुनरपिपश्चादुत्पत्त्यनंतरमपि॥

॥जातंमय्येवसर्वंपुनरपिमयितत्संस्थितंचैवविश्वंसर्वंमय्येवयातिप्रविलयमितितद्ब्रह्मचैवाहमस्मि॥

तत्समस्तंविश्वंजगत॥मयिशिवकेब्रह्मात्मनि॥संस्थितंसम्यक्स्थितंभासं॥किंचतत्सर्वसमस्तंजगतमयि
वेशवलेब्रह्मण्येवप्रविलयंनिद्राप्रलयसमयेसंबाजंसुषुप्तेमयिज्ञानेनअत्यंतनाशंतिरोधानमित्यर्थः॥याति
प्राप्नोति॥इत्यतोक्तेः॥ततयतोवाइमानिभूतानिजायंतेइत्यादिकथातद्ब्रह्मेतीत्यनयाश्रुत्योत्पत्तिस्थितिलि
याध्यारवचोपलक्षितोपादनत्वेननिर्दिष्टं॥अहंदेशकालवस्तुकृतपरिच्छेदरहितंवस्तुअहंअरूपदलक्षितः

कूटस्थप्रत्यगात्मा अस्मि भवामि ॥ च पुनः यस्यं ब्रह्माभिन्नप्रत्यगात्मनः स्मृत्या अनुसंध्यानेन ॥ यज्ञा
द्यखिलशुभविध्यौ ॥ यज्ञो अश्वमेधादिः यस्य वा नयेयादेस्तादृशे समस्तशुभकर्मणि विधाने कार्यं कर्त
व्यविधिः ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
॥ यस्य स्मृत्या च यज्ञाद्यखिलशुभविध्यौ सुप्रयाति रूकार्यं न्यूनं संपूर्णतां वै तमक्षमतिं मुदे वाच्यु
॥ तं सनंतोस्मि ॥ १०० ॥ इति श्रीमत्परमहंसपरिव्राजिकाचार्यश्रीमत्संकराचार्यविरचिता शतश्लो
॥ कीसमाप्तमस्तु ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥
न्यूनं मंत्रतंत्रादिभिर्न्यूनमपि वैनिश्चयेन संपूर्णतां समाप्तिं ॥ फलप्रदत्वमित्यर्थः ॥ सुप्रयाति प्राप्नोति ॥ अ ॥ पत्र ॥
क्षराभिन्नकूटस्थात्मसाक्षात्कारवृत्त्यैव केवलं ॥ ब्रह्माभिन्नं प्रत्यगात्मनं ॥ अच्युतं अप्रयुच्यतं स्वभा ॥ १३ ॥

वं ॥ सन्नतः अष्टांगभूतो भक्तिसहितः तत्र लीनः अस्मि भवामि ॥ १०० ॥ इति श्रीमत्परमहं
सपरिव्राजिकाचार्यश्रीमच्छंकराचार्यविरचिता शतश्लोकी तस्य टीका ॥ समाप्त ॥ ॥ श्रीरस्तु ॥
कल्याणमस्तु ॥ ॥ शुभं भवतु ॥ ॥ छ ॥ ॥ छ ॥ ॥ छ ॥

॥[illegible]॥
॥१५॥